Ex/Sans/UG/5.3/39/2018

# BACHELOR OF ARTS EXAMINATION, 2018

(3rd Year 5th Semester)

## SANSKRIT (Honours)

## Course : XIII

## [ Epigraphy and Arthas'āstra ]

Time : Two Hours | Full Marks : 30

*The figures in the margin indicate full marks.*

१. सुरगिरा देवनागर्या च लिप्या **त्रयः** प्रश्नाः समाधेयाः। 1×3=3

(क) उदिताचार्येण कयोः आचार्ययोः प्रतिमाद्वयं गुर्वायतने प्रतिष्ठापितम्?

(ख) आचार्यपरंपरायां भगवत्कुशिक-भगवत्पराशरयोः मध्ये कति आचार्याः आसन्?

(ग) मथुरास्तम्भलेखे केषां ''विज्ञप्तिः क्रियते संबोधनं च''?

(घ) ''मा लुप्यतामभिनवा वनमालिकेति'' — कया कः उपहसितः?

(ङ) ''शाखाग्रलग्नमुखरद्विजशीलितश्रीः'' इति श्लिष्टे पदे भवदेववंशपक्षे शाखा इत्यस्य वंशवृक्षपक्षे च द्विज इत्यस्य अर्थौ देयौ।

[*Turn over*]

२. अधोलिखितेषु **द्वौ** प्रश्नौ समाधेयौ। 6×2=12

(क) ''अस्यां पूर्वायां ...................... गुर्वायतने गुरु .... प्रतिष्ठापितौ'' — द्वितीयचन्द्रगुप्तस्य मथुरास्तम्भलेखाद् उद्धृतेऽस्मिन् वाक्ये प्रयुक्तं रेखाङकितं पदं विशदं व्या ख्यायताम्। अस्मिन् अभिलेखे समुद्रगुप्त-चन्द्रगुप्तयोः के उपाधयः दृश्यन्ते ? तेषाम् उपाधीनाम् वैशिष्ट्यं निर्दिश्यताम्। (4+2=6)

(ख) भट्टभवदेवेन प्रतिष्ठितः देवालयः राढदेशे एव आसीत्, न तु भुवनेश्वरे, इति भट्टभवदेवस्य भुवनेश्वरप्रशस्त्याः ग्रन्थपर्यालोचनेन प्र दर्श्यताम्। केन प्रकारेण अयमभिलेखः भुवनेश्वरस्य अनन्तवासुदेवाधिष्ठानं प्राप्तः ? (3+3=6)

(ग) भट्टभवदेवः कं राजानं सेवितवान् ? तेन राज्ञा सः कस्मिन् पदे नियुक्तः ? तस्य कर्मनैपुण्याद् असौ राजा कथं समृद्धिं प्राप्तवान् ? स राजा प्रशस्त्यनुसारं वर्ण्यताम्। (1+1+2+2=6)

(घ) निम्नोद्धृते संदर्भद्वये द्वितीयचन्द्रगुप्तस्य मथुरास्तम्भलेखस्य संपादितौ अंशविशेषौ दृश्येते। अत्र या संपादनपद्धतिः आश्रिता तस्याः व्याख्या कार्या। (3+3=6)

(अ) 10 गुर्व्वायतने गुरु ..... [5]प्रतिष्ठापितो[6] ( ।* )नै —

11 तत्ख्यात्यर्थमभिलि[ख्यते] ( ।* ) [अथ*]

(आ) 16 वा[1] [स] पंचभिर्महा[ा*] पातकैरुपपातकैश्च संयुक्तस्स्यात् ( ।* )

17 जयति च भगवा[ण्डण्डः][2]रुद्रदण्डो( ऽ* )ग्र[ना]यको नित्य[ ॰ ] (त्यम्) ( ।।* )

[*Turn over*]

३. सुरगिरा देवनागर्या च लिप्या **त्रयः** प्रश्नाः समाधेयाः। 1×3=3

(क) जनमेजयः अजबिन्दुश्च कथं विनष्टौ ?

(ख) राजर्षिवृत्तम् आचरन्तं विजिगीषुं रहसि प्रमाद्यन्तं के कथं च नियमयेयुः ?

(ग) वैवस्वतमनोः कीदृशं भागधेयं प्रजाः प्रकल्पयामासुः ?

(घ) भोगेनासंतुष्टः व्यसनी च यथाक्रमं कस्मिन् कृत्यवर्गद्वये अन्तर्भवतः ?

(ङ) आत्मसंपन्नं पुत्रं कस्मिन् पदे स्थापयेत् राजा ?

४. अधोलिखितेषु **द्वौ** प्रश्नौ समाधेयौ। 6×2=12

(क) अपरुद्धशब्दस्य कोऽर्थः ? अपरुद्धस्य एकचरस्य राजपुत्रस्य कीदृशं वृत्तं कौटिल्येन उप दिश्यते ? (1+5)

(ख) क्रुद्धवर्ग-भीतवर्गयोः स्वरूपमुक्त्वा तयोः उपजापः केन प्रकारेण कर्तव्य इति वि व्रियताम्। (3+3)

(ग) राजपुत्ररक्षणम् इति पदस्यार्थः उच्यताम्। तद्विषये कौटिल्यपूर्वाचार्याणां मतानि समासत उल्लिख्यन्ताम्। (1+5)

(घ) इन्द्रियजयशब्दस्य कौटिल्यसंमता व्याख्या उप स्थाप्यताम्। राजर्षिवृत्तप्रसङ्गे त्रिवगसेवा कथम् उप दिश्यते ? (3+3)